इंडिया टीवी .in
www.indiatv.in

शीतलाष्टक स्तोत्र

॥ विनियोग ॥

ॐ अस्य श्रीशीतला स्तोत्रस्य महादेव ऋषिः, अनुष्टुप् छन्दः, शीतली देवता, लक्ष्मी बीजम्, भवानी शक्तिः, सर्वविस्फोटक निवृत्तये जपे विनियोगः ॥

ऋष्यादि-न्यासः

श्रीमहादेव ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमः मुखे, श्रीशीतला देवतायै नमः हृदि, लक्ष्मी (श्री) बीजाय नमः गुह्ये, भवानी शक्तये नमः पादयो, सर्व-विस्फोटक-निवृत्यर्थे जपे विनियोगाय नमः सर्वांगे ॥

ध्यान

ध्यायामि शीतलां देवीं, रासभस्थां दिगम्बराम् ।

मार्जनी-कलशोपेतां शूर्पालङ्कृत-मस्तकाम् ॥

मानस-पूजन

ॐ लं पृथ्वी-तत्त्वात्मकं गन्धं श्री शीतला-देवी-प्रीतये समर्पयामि नमः। ॐ हं आकाश-तत्त्वात्मकं पुष्पं श्री शीतला-देवी-प्रीतये समर्पयामि नमः। ॐ यं वायु-तत्त्वात्मकं धूपं श्री शीतला-देवी-प्रीतये समर्पयामि नमः। ॐ रं अग्नि-तत्त्वात्मकं दीपं श्री शीतला-देवी-प्रीतये समर्पयामि नमः। ॐ वं जल-तत्त्वात्मकं नैवेद्यं श्री शीतला-देवी-प्रीतये समर्पयामि नमः। ॐ सं सर्व-तत्त्वात्मकं ताम्बूलं श्री शीतला-देवी-प्रीतये समर्पयामि नमः।

मन्त्रः

ॐ ह्रीं श्रीं शीतलायै नमः ॥ (11 बार)

ईश्वर उवाच

वन्देऽहं शीतलां देवींरासभस्थां दिगम्बराम्।

मार्जनीकलशोपेतांशूर्पालङ्कृतमस्तकाम्॥1॥

वन्देऽहं शीतलां देवींसर्वरोगभयापहाम्।

यामासाद्य निवर्ततेविस्फोटकभयं महत्॥2॥

शीतले शीतले चेतियो ब्रूयद्दाहपीडितः।

विस्फोटकभयं घोरंक्षिप्रं तस्य प्रणश्यति॥3॥

यस्त्वामुदकमध्ये तुध्यात्वा सम्पूजयेन्नरः।

विस्फोटकभयं घोरंगृहे तस्य न जायते॥4॥

शीतले ज्वरदग्धस्यपूतिगन्धयुतस्य च।

प्रणष्टचक्षुषःपुंसस्त्वामाहुर्जीवनौषधम्॥5॥

इंडिया टीवी .in
www.indiatv.in

शीतले तनुजान् रोगान्नृणां हरसि दुस्त्यजान्।
विस्फोटकविदीर्णानांत्वमेकाऽमृतवर्षिणी॥6॥
गलगण्डग्रहा रोगा येचान्ये दारुणा नृणाम्।
त्वदनुध्यानमात्रेणशीतले यान्ति सङ्क्षयम्॥7॥
न मन्त्रो नौषधं तस्यपापरोगस्य विद्यते।
त्वामेकां शीतले धात्रींनान्यां पश्यामि देवताम्॥8॥

॥ फल श्रुति ॥

मृणालतन्तुसदृशींनाभिहृन्मध्यसंस्थिताम्।
यस्त्वां सञ्चिन्तयेद्देवितस्य मृत्युर्न जायते॥9॥
अष्टकं शीतलादेव्यायो नरः प्रपठेत्सदा।
विस्फोटकभयं घोरंगृहे तस्य न जायते॥10॥
श्रोतव्यं पठितव्यं चश्रद्धाभाक्तिसमन्वितैः।
उपसर्गविनाशायपरं स्वस्त्ययनं महत्॥11॥
शीतले त्वं जगन्माताशीतले त्वं जगत्पिता।
शीतले त्वं जगद्धात्रीशीतलायै नमो नमः॥12॥
रासभो गर्दभश्चैवखरो वैशाखनन्दनः।
शीतलावाहनश्चैवदूर्वाकन्दनिकृन्तनः॥13॥
एतानि खरनामानिशीतलाग्रे तु यः पठेत्।
तस्य गेहे शिशूनां चशीतलारुङ् न जायते॥14॥
शीतलाष्टकमेवेदं नदेयं यस्यकस्यचित्।
दातव्यं च सदा तस्मैश्रद्धाभक्तियुताय वै॥15॥

॥ इति श्रीस्कन्दपुराणे शीतलाष्टकं सम्पूर्णम् ॥